पणादि। ४७। कामनारीहवपूर्व्वकदेवीविशेषमन्त्रजपः। ४८। तारा-
सिद्धिप्रकरणे फलश्रुत्यादिकथनम्। ४९। सौभाग्यपदयन्त्रमेखलधारणादि
प्रकारः। ५०। यन्त्रलेखनाङ्गतिविशेषफलादि। ५१। भूमौ यन्त्रलेखन-
प्रकारादि। ५२। मालाविशेषजपसिद्धिदिननियमकथनादि। ५३। रज-
ताद्यङ्गुरीयधारणनियमः। ५४। सर्व्वविधमालानिर्णयः। ५५। तत्पञ्च-
कथनम्। ५६। स्त्रीदीक्षाविनिर्णयः। ५७। योगनिर्णयः। ५८। आसन-
विशेषजपप्रकारादि। ५९। कालिकापूजनप्रकारादि। ६०। ब्रह्मराक्षा-
भिधयोगकथनम्। ६१। मुद्राविवरणम्। ६२। भग्नदन्तप्रायश्चित्तादि।
तृतीयखण्डः। १। जपप्रकारादिकथनम्। २। महायन्त्रसंस्कारः।
३। मालायामजपः। ४। मन्त्रप्रकारनिर्णयः। ५—१०। यमदण्डाख्य-
न्यासक्रम स्नानप्रकार-होमप्रकार सन्ध्याकर्म्म दीक्षादिविनिर्णयः। मासादि-
विनिर्णयः। देशनियमः। शवसाधना। देशस्वरूपः। देवीपूजनमाहात्म्य-
वेदपठनादिनारीपूजनम्। ११। धूमकेतूल्कापातादिमहीनृपातफलस्थान
विनिर्णय-पुरश्चर्य्याभिदमूलनिरूपणकथनम्। दन्तकमलमालासुपनिकथनम्।
महाकालादिनित्यानां निर्णयकथनम्। १२। परकायप्रवेशनादिकथनं,
षट्चक्रमतफलादिकथनं, कामिनीनित्याविनिर्णयः। १३। कपालिनीमन्त्र
सिद्धिप्रकारादि। १४। कुरुकुल्लामरीचित्यादिसाधनप्रकारकथनम्।

१५। विप्रचित्तानित्योपासनसाधनादि। १६। दीप्तनित्याविधानकथनं, नीलानित्याविधिज्ञानम्। १७। घनानित्याक्रमार्चनं, बलाकापूजनं, मातानित्याविधानं, मुद्रानित्याविधानं। १०। मितानित्याविधिक्रमः, यन्त्रधूपकथनम्। १८। तिरस्कारिणीविद्यामन्त्रार्चनकथनादि। १९। सम्पत् सरस्वतीमन्त्रार्चनकथनादि। २०। मधुमतीयन्त्रविद्याकथनादि।

चतुर्थखण्डः। १। दशमहाविद्यामन्त्रकथनं। २। डामरत्रयमन्त्रादिकथनम्, षड्वक्त्रादिदेवतानामोल्लेखः, तन्त्रविशेषाम्नायक्रमः, राजयोगसाधनप्रकारः। ३। जपविशेषादिप्रकारः। ४। मार्गभेदेन विद्याविशेषसाधनभेदकथनादि। ५। शक्तिपूजार्थपुष्पविशेषदेशपर्य्यायभेदेनाम्नायभेदकथनादि। बगलोत्पत्तिकारणच्छिन्नोत्पत्तिकारण-मातङ्गीउत्पत्तिकारणादि, षडाम्नाय क्रमेण शक्तवर्णनं, कालपर्य्यायेण तन्त्रगणनं, शैवतन्त्रकथनादि। ७। आम्नायभेदेन विद्याभेदकथनादि। ८। पञ्चभेदनिर्णयः। कालिकायाः सर्व्वविद्यास्वरूपत्ववर्णनादि। १०। विद्यासाधनमतभेदादिकथनम्। ११। कौलाचारविधानं, पुष्पभेदाहुतिः, यन्त्रप्रपूजनप्रकारः, साधनकाल-निर्णयः, अष्टपत्रादिकथनं, ब्रह्मराक्षसजातिवर्णनम्।

Going through the Ms. we see two additional patalas or chapters, one in the first part between the 34th chapter and the 35th with the colophon :—

इति शक्तिसङ्गमहातन्त्रे लतासाधकसामान्यसङ्केतनामविंशत्पटलः

And the other in the third part after the 17th chapter with the colophon :—

इति श्रीषट्शाम्भवे षष्टिसहस्रे श्रीं दक्षभैरवीये शक्तिसङ्गमतन्त्रराजोत्तमे मितानित्याविधि-र्नाम सप्तदशःपटलः।

On consideration of the number of chapters marked by the colophons at the end of these parts, we see that they are mere additional ones, wrongly written by the copyist of the Ms. and as they deal with the subjects similar to those in the preceding chapters, they must be included in them. Unlike the Ms. referred to by Dr. Rajendralal Mitra, this one contains sixty-two paṭalas or chapters in the first part, the other contains sixty-five. On comparision of the contents of these two Ms. we see the subject matter is the same. The difference of three chapters lies in the fact that the 30th chapter of Dr. Mitra's Ms. is included in the 29th chapter of

this Ms. and the 33rd, the 34th and the 35th chapters of Dr. Mitra's Ms. are included in the chapter thirty two of this Ms.

विवरणम्—पुस्तकेऽस्मिन् खण्डचतुष्टयसमन्वितो विविधशाक्तविषयात्मकः शक्तिसङ्गमतन्त्रनामा तन्त्रराजः सम्पूर्णो वर्त्तते ।

No. 92. शाक्तसर्व्वस्वम् । Śāktasarvasvam. Substance, country-made reddish paper, 13 × 2½ inches. Folia, 6. Lines, 8-9 in a page, with marginal notes in some pages. Character, Bengali. Date, ? Appearance, old. Prose and verse. Generally correct. Complete.

An attempt of reducing the Metaphysics of Tantra into a philosophical system. Noticed in Dr. R. L. Mitra's Notices of Sanskrit Mss., Vol. III and IV, Page 13, No. 1027.

Beginning. श्रीदुर्गायै नमः । पुराणाचार्य्यनरसिंहठक्कुरकृतसारसमुच्चयव्याख्या । भक्तिः सिद्धेर्गरीयसीत्यत्र सिद्धेः सम्बन्धे भक्तिरेव गरीयसी न तु कर्म्मादि गरीयः । तर्हि सर्व्वतस्तदीशितोरिवेति दृष्टान्तो नायत्नतः । शर्करा भक्तिः लोकस्पृहास्पदा तदीशितः स्पृहास्पदकथनशीलायाः सिद्धेः । तथाच गीतासुबोधिन्यां ब्रह्मानन्दे सुधानन्दानामन्तर्हितत्वात् भक्तियोगोऽस्य सिद्धिद इत्यादि ग्रन्थम् ।

End. एवं देवीसूक्तपाठफलकथने गोभिलसूत्रे कुलतिथिनिर्णयनादागमाद्यर्थवेदयोः प्रामाण्यमायाति । गीतासुबोधिन्यां योगयुक्तिः मदीयः कोऽप्यचिन्त्यः प्रभावविलासः स एव माया । बुद्धिरूपा योगमाया ददामि तेन भक्ता मां प्राप्नुवन्ति । योगात् योगमायासामर्थ्यात् इदं मया दर्शितं मायाया निजशक्त्या ।

Colophon. इति शाक्तसर्व्वस्वः (?) समाप्तः (?) ।

विवरणम्—पुस्तकेऽस्मिन् शाक्तसर्व्वस्वं नाम शक्तिविषयकः ग्रन्थः सम्पूर्णो वर्त्तते ।

No. 93. शाक्तानन्दतरङ्गिणी । Śaktānandataraṅgiṇī. Substance, country made yellow paper, 15 × 4 inches. Folia, 71. Lines, 1–10 in a page, cleanly bordered by three lines around. Character, Bengali. Date, Śakavdā 1756, the 6th Chaitra. Appearance, old. Prose and verse. Generally correct. Complete.

A Tāntrika work on Śaktism described in the Catalogue of Sanskrit Mss. in the Library of Sanskrit College, No. 96, Page 98, Vol. 17. At the end of this Ms. we find the colophon.

इति शाक्तानन्दतरङ्गिण्यां अष्टादशोल्लासः ।

शाके शैलधरारसेन्दुगणिते चैत्रस्य षष्ठे दिने
शाक्तानन्दतरङ्गिणी शुभकरी त्रैलोक्यरक्षाकरी ।
पादाम्भोजयविश्वसाधनमहामन्त्रादिविद्योतिनी
श्रीमद्वामनदासकेन लिखिता विप्रेण गङ्गोद्भुवा ॥
दाक्षशान्तकान्तमूर्त्ति साधुकीर्त्तिसन्मति-
श्रीमहेशमौलिकीपादपद्मसेवक-
ज्ञानमानदानयुक्तविप्रभक्तितत्पर-
श्रीमदन्नप्रसादभूसुरानुदेशतः ।

समाप्तः । शकाब्दाः १७५६ । ६ चैत्र । श्रीश्रीदुर्गा । यथादृष्टं तथालिखितं लेखके नास्ति दूषणं श्रीश्रीदुर्गा श्रीश्रीहरिः ।

From the colophon we see that the Ms. was copied by Bāmanadāsa, at the injunction of a Brahmin named Annaprasāda.

विवरणमुक्तपूर्वम् ।

No 94. शाक्ताभिषेकः । Śāktābhiṣekaḥ. Substance, country-made reddish paper. Folia, 3. Lines, 8–9 in a page. Character, Bengali. Date, ? Appearance, old. Prose and verse. Generally correct. Complete.

This codex contains the process of ablution of a disciple according to the Śākta rites.

Beginning. अथ कुम्भस्थापनमाह । भैरवीतन्त्रे

ईश्वर उवाच ।

मायाबीजं समुच्चार्य्य कुम्भमानीय यत्नतः ।
शोधयेत् कामबीजेन वाग्भवेन शोधयेत् ॥
पृथ्वीबीजेन संशोध्य मृत्तिकां तत्रविन्यसेत् ।
लक्ष्मीबीजेन धान्यञ्च वधूबीजेन विन्यसेत् ॥

End. नश्यन्तु विपदः सर्व्वाः सम्पदः सन्तु सुस्थिराः ।
अभिषेकेण शाक्तेन पूर्णाः सन्तु मनोरथाः ॥
इति ततः स्वस्वदेवताहोमं कृत्वा कश्यपस्यादिहोमतिलकं दत्वा चाशीर्व्वादं
कृत्वा दक्षिणाच्छिद्रावधारणं कुर्य्यात् ततो गुरुं सन्तोषयेत् ।

Colophon. इति शाक्ताभिषेकं (:?) समाप्तम् (:?)

विवरणम्—पुस्तकेऽस्मिन् शाक्ताभिषेकोनाम शाक्तशिष्याभिषेकविषयको निबन्धो वर्त्तते ।

No 95. शाक्ताभिषेकः । Śaktābhiṣekaḥ. Another copy of the same, being written in a foolscap paper, 18×9 inches, and its *letters being effaced and destroyed throughout, we do not mention* it here.

No. 96. शाम्भवीतन्त्रे ज्ञानसङ्कुली । Śāmbhavītantre Jñānasaṅkulī. Substance, country-made reddish paper, 19×2½ *inches. Folia,* 18. *Lines,* 5 in a page, with a semi-circular gap of about 1½ inches diameter in the middle. Character, Bengali. Date, Śakābda 1710, 29th Māgha. Appearance, old. Verse. Generally correct. Complete.

This codex contains only a chapter from the Śāmbhavītantra, dealing with Brahmajñāna, called *Jñānasaṅkulī*, copied by Viśvanāth *Brahmacārī Bhaṭṭācāryya.*

Beginning. ओँ नमो गुरवे परमात्मने नमः। अथ शाम्भवीतन्त्रं ।

नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ।
नमामि ज्ञानपुरुषं परं ब्रह्म च सर्व्वदा ॥
शब्दस्पर्शरूपरसगन्धाकारविवर्ज्जितं ।
साधकानान्तु सिद्ध्यर्थमितरेदश पञ्चकम् ।

End. वेदान्तसारसर्व्वस्वं उमायै शिवभाषितं ।
सिध्यन्ति सर्व्वयोगिनो मानकार्य्यविचारणा ॥

Colophon. इति श्रीयोगशास्त्रे शाम्भवीतन्त्रे उमामहेश्वरसम्वादे ज्ञानसंकुली समाप्ता ।५॥
ओम् शान्ति रों शान्ति रों शान्तिः ॥

योगशास्त्रं महापुण्यं लिखितं ज्ञानसिद्धये ।
खचन्द्रयचन्द्रे सत् शाके श्रीब्रह्मचारिणा ॥

शकाब्दा । १७१० । तां २८ माघस्य दिवा प्रहरैकसमये । ० ॥

विवरणम्—पुस्तकेऽस्मिन् योगशास्त्रे शाम्भवीतन्त्रोक्तः ज्ञानसंकुली नाम ब्रह्मज्ञानविषयको निबन्धो वर्त्तते ॥

No. 97. शिवरहस्यम् । Sivarahasyam. Substance, country-made yellow paper, 20 x 4 inches. Folia, 250. Lines, 4-9 in a page, with a gap of about 1½ inches square in the middle. Character, Bengali. Date, ? Appearance, old. Verse. Generally correct. Incomplete.

An anonymous compilation from the Tantras giving all accounts of Śiva and his surroundings, and the methods of his worship, under the name of Śivarahasyam. Noticed in Dr. R. L. Mitra's Notices of Sanskrit Manuscripts No. 233, Vol. 1. Dr. Mitra's Ms. is said to be complete in 19 chapters, but this Ms. contains 24 chapters and an incomplete portion of another.

Beginning. ओँ नमो गणेशाय ।

ऋषय ऊचुः ।

सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
सर्व्वपापहरं वदाख्यं कृपालो मुनिसत्तम ॥
कः सेव्यः सर्व्वदेवेषु को वा ध्येयो मनुः सदा ।
स्थानं कुत्र वा नित्यं किं वा मन्त्रादिसाधकम् ॥

महादेवं विनाश्चार्कं नास्ति दुःखनिवारकम् ।
तत्पूजां कुरु यत्नेन केशव केशिनाशिनी (नाशन ?) ॥
ध्याकममरादीनां शिव एवेष्टदैवतम् ।
दुःखं विनश्यत्यखिलमिष्टदैवतपूजया ॥
करिष्यसि यदि प्रीत्या सत्वरं शङ्करार्चनम् ।
तदा त्वयाधुना नाश्यं दुःखमद्य जनार्दन ॥
केशवालस्यरहित कुरु शङ्करपूजनम् ।
यदालस्यं तदनार्यं दुःखमद्य पुनर्भुवे ॥

ब्रह्मोवाच ।
इत्युक्तं तद्वचः श्रुत्वा केशवः सत्वरं तदा ।
शङ्करं पूजयामास + + + ॥

Colophon.

Being an incomplete one, this Ms. has not the last colophon. The colophon of the 24th chapter is given below :—

इति शिवरहस्ये शर्वांशे शिवगौरीसम्वादो नाम चतुर्विंशोऽध्यायः ।

विवरणम्—पुस्तकेऽस्मिन् शिवमाहात्म्यपूजाप्रकारादिविषयकः शिवरहस्याभिधेयः ग्रीकमयो शिवगौरीसम्वादो वर्त्तते ॥

No. 98. शिवस्तोत्रं । Śivastotram. Substance, yellow-coloured palm leaf, 8 × 2 inches. Folia, 1. Lines, 6 in a page. Character, Bengali. Date, ? Appearance, nearly fresh. Verse. Correct. Complete.

This codex contains a hymn to Śiva. Anonymous.

Beginning. अथ शिवस्तोत्रम् ।

जगतामेकपुरुषो जगतां जीवनात्मकः ।
प्रसीद त्वं जगन्नाथ जगद्योने नमोऽस्तु ते ॥

End. तस्याद्यन्तं त्रिभुवने न किञ्चिदपि वर्त्तते ।
ऐहिकं किं फलं तस्य मुक्तिरेव करे स्थिता ॥

Colophon. नास्ति।

विवरणम्—पुस्तकेऽस्मिन् शिवविषयकं स्तोत्रमेकं वर्त्तते।

No. 99. **शिवार्चनचन्द्रिका।** Śivārcanacandrikā. Substance, country-made yellow paper, 18 × 3 inches. Folia, 184. Lines, 6 in a page, with a gap of about $1\frac{1}{2}$ in. × 1 in. in the middle. Character, Bengali. Date, ? Appearance, old, worm-eaten and writings effaced in some parts. Not correct. Incomplete.

A compilation from different Tantras on the worship of Śiva in the initiation of a disciple in the Mantra of that God with the details of its accessories and dealing at the beginning with the process of initiation in general, named *Śivārcanacandrikā, by Śrīnivāsa* Bhaṭṭa, containing only ten chapters and a portion of the eleventh one.

Beginning. ओं नमो गणेशाय।

श्रीमन्तं सिन्दूरार्भं शशिशकलधरं बद्धमौवाभिरामं
गङ्गाद्भिः सिक्तगण्डं मदनविकसितं लोचनं चित्रयन्तं।
+ + + विविधवक्त्र
वन्दे सिन्दूरपुरैर्गिरिवरसुतया चर्चितं तीर्थभूरुक्षम्॥

The lines being generally effaced in the first page, we cannot quote much in the beginning, we quote only a few lines giving an account of the author.

देशोऽस्तिदक्षिणे दिशि द्राविडाभिधानः
काञ्चीति यत्र वसतिः परमायकस्य।
पुण्या पुरी पुन नि + न भागधेयं
सीमाग्रदं त्वरितकोऽभिरक्षणनी:।
चाविर्बभूव इयमित्यमलैर्विरिञ्चो
यत्र स्वयं भगवान् दयया रमेशः।
तत्रापि इविविविन्नाथ इति प्रतिद्धः
सम्भूयते सकलमौलमणिर्नादिः॥

तस्माद्दक्षिणदिग्गतः क्षितिसुरैः षट्शास्त्रविद्भिर्युत-
र्वेदैः सोपनिषद्भिरङ्गसहितैराद्यैः सदाधिष्ठितः ।
पाश्चिन्यायतिविश्रुतः क्षितितले पुण्याग्रदीतोऽभ्यु-
दृंश्री यागगृहाङ्कनः सकलदिग्व्याप्तोऽग्रहारो महान् ॥
आत्रेयगोत्रजलपद्मविकाशमित्र-
स्तत्रास्ति र× सुमहाञ्छ्रुतसत्रकर्ता ।
भक्तार्थिदीनकृपणाश्रयकल्पनामा
षट्शास्त्रवित् समरपुङ्गवदीक्षितोऽभूत् ॥
तस्यात्मजः फणिपतिर्वरपाणिनीये
मीमांसकेष्वपि गुरुः श्रुतिषु सुदक्षः ।
स द्वादशाहचयनाखिलवाजपेय-
सोमाध्वरी सुमतिरुश्मनदीक्षितोऽभूत् ।
तन्नन्दनः सकलवेदविदां वरिष्ठः
श्रौतक्रियासु निपुणः चितसोमदीक्षः ।
आसीदशेषगुणरत्ननिधिः पृथिव्यां
श्रीश्रीनिकेतन इति प्रथितो मुनीन्द्रः ॥
तत्सूनुः श्रीनिवासः सकलनिगमवित् सर्व्वशास्त्रार्थवेत्ता
श्रौतस्मार्त्तेषु कर्म्मस्वतिशयनिपुणः सत्कविः स्वीयदेशात् ।
पीठं कालस्वराख्यं प्रकटितविभवं प्राप्य यात्राप्रसङ्गात् ।
तत्र श्रीसुन्दराख्यं सकलगुणनिधिं प्राप्य सद्देशिकेन्द्रम् ॥
तत्पादपङ्कजयुगं परिचर्य्य तस्मात्
प्राप्याभिषेकमखिलागममप्यधीत्य ।
तस्याज्ञया समधिगम्य पुरं स काशीं
तत्राकरोद् वसतिमात्मविदां वरिष्ठः ॥
तत्र स्थितः सकलतन्त्ररहस्यवेत्ता
शिष्यैः शिवार्च्चनपरैः शिवशैवदीक्षैः ।
अभ्यर्थितो वितनुते सकलागमार्थ-
सारोदयां भुवि शिवार्च्चनचन्द्रिकां सः ॥

Śrinivāsa Bhaṭṭa was the son of Śrīniketana, grandson of Usmana Dīkṣit, and great grandson of Samarapungava Dīksita. He belonged to the Ātreya dynasty, and was an inhabitant of Yāgagṛihānkana, a prosperous village in the province of Drāviḍa in the Deccan.

Once in the course of his journey, he came to the sacred place named Jālandhara, and found there Sundarācāryya, a man of wonderful merits, by whom he was initiated and taught various Tantras. Then by his order he went to Benares where he settled and gathered a number of Śaiva disciples, at whose request he compiled Śivārcana-candrikā, from all Tantras.

End. नास्ति ।

Colophon.

The colophon at the end of the tenth chapter is given below :—

इति श्रीसुन्दराचार्यचरणद्वन्द्वान्तेवासिश्रीश्रीनिवासभट्टेन कृतायां चन्द्रिकायां दशमः प्रकाशः ।

विषयाः ।

We give below the contents of the Ms. upto the tenth chapter, beyond which we get nothing, the Ms. being an incomplete one.

१। गुरुशिष्यलक्षणानि। गुरुशिष्यपरीक्षा। मन्त्रदीक्षाः, तल्लक्षणानि। योनिलक्षणम्। २। मन्त्रशोधनप्रकारः। नक्षत्रराशिवारभौतिकचक्राणि। मन्त्राणां सिद्धासिद्धादिदोषप्रकारः। द्वादशारचक्रं, तच्चक्रनिर्माणप्रकारः। ऋणधनशोधनप्रकारः। मण्डपनिर्माणविधिः। ३। योनिकुण्डम्। तत् कुण्डरचनाप्रकारः। वृत्तकुण्डम्। तत् कुण्डरचनाप्रकारः। षडस्रकुण्डम्, तत् कुण्डरचनाप्रकारः। पद्मकुण्डम्। अष्टास्रकुण्डम्। पञ्चास्रकुण्डम्, तन्निर्माणप्रकारः। समास्रकुण्डम्। कुण्डभेदेन फलभेदः। कुण्डस्य रूपं तत्रामता च। होमसंख्याभेदेन कुण्डमानभेदः। वास्तुपूजा। तत् फलम्। अङ्कुरार्पणविधिः। दीक्षाकालः। नक्षत्राणि। तिथयः। देवताविशेषे तिथिविशेषः। वारराशि। योगाः। लग्नानि। चन्द्रबलम्। दीक्षायां कालविशेषः। ४। दीक्षातत्त्वम्। शरीरत्रिलक्षणक्रमः। कलादीक्षादि। ५—८। दीक्षाप्रयोगः। स्वप्नपरीक्षा। होमविधिः। होमद्रव्यमानादि। सन्ध्या। भूतशुद्ध्यादि। अन्तःकरणमातृकान्यासादि। योगपीठपूजा। आवरणदेवतापूजा। गर्भाधानादिपूजानन्तरम् इष्टदेवतापूजनम्। चक्रमाहात्म्यम्। शिवध्यानलक्षणानि। आवाहनम्। षोडशोपचारपूजनम्। ९। नित्य-

पूजाप्रयोगः। शैवानां तान्त्रिकसन्ध्या। १०। मातृकान्यासः। केवल मातृकान्यासः। श्रीकण्ठादिमातृकान्यासः। श्रीभुवनेश्वरीमातृकान्यासः। कामबीजादि। शक्तिश्रीकामबीजादि। प्रपञ्चयागमातृकान्यासः। मूलमन्त्रेण प्राणायामत्रयम्। योगपीठन्यासः। मूलमन्त्रन्यासः। प्राणप्रतिष्ठादिपूर्व्वकशिवार्च्चनम्।

विवरणम् – पुस्तकेऽस्मिन् शिष्यस्य शिवमन्त्रदीक्षाप्रसङ्गतः तन्त्रोक्तदीक्षाक्रियाङ्गभूतकर्म्मसमुच्चयतत्व्यवस्थादिसहितो मातृकान्यासादिपूर्व्वकशिवार्च्चनविषयकः सन्निबन्धः श्रीशिवार्च्चनचन्द्रिकाभिधेयो द्राविडान्तर्गतत्यागराजाद्धनापदारयात्स्या(?)विवंशोद्भूतश्रमरपुङ्गवदीक्षितप्रपौत्रो ज्ञानदीक्षितपौत्रश्रीनिकेतनपुत्रेण कालिदासाधिवासिसुन्दराचार्य्यशिष्येण श्रीनिवासभट्टेनाखिलतन्त्रसारमुद्धृत्य रचितोऽसम्पूर्णो वर्त्तते।



No. 100. शैवसुधाकरः। Śaivasudhākara. Substance, country-made yellow paper, 12 × ½ inches. Folia, 22 Lines, 7–10 in a page. Character, Bengali Date, ? Appearance, old, and torn out in some parts. Verse. Not correct. Incomplete.

A Tāntrika work on the superiority of Śiva, compiled by Svāmī Sadānanda to please a Śaiva king named Rāmasingha belonging to the solar dynasty. It is an incomplete one and contains only four chapters and a small portion of the fifth.

Beginning. ओं तत् सत्।

> सुखचिन्तुर्मतिमिरो यो नाम्पदं मायया
> जीवेशादि विभेदभाक् खपवनाग्न्यद्भूमिक्रमीलया
> येषां × × तमांसि नीत्य तु मतिं लोकावलीर्णः प्रभु-
> लिङ्गात्मकरूपार्च्चुधीर्विजयतां श्रीसाम्बमूर्त्तिः शिवः ॥ १ ॥

End. नास्ति।

Colophon. श्रीमत्स्वामिसदानन्दविरचिते शैवसुधाकरे ऊर्द्ध्वपुण्ड्रादिखण्डनं नाम चतुर्थः किरणः।

विवरणम्—पुस्तकेऽस्मिन् शिवपूजोत्कर्षभस्मरुद्राक्षमाहात्म्यलिङ्गपूजादिविषयकः शैवसुधाकरनामा रविवंशोद्भवश्रीरामसिंहस्य प्रीत्यै श्रीमत्सदानन्दस्वामिना विरचितः शैवप्रबन्धोऽसम्पूर्णो वर्त्तते।



No. 101. श्यामारहस्यम्। Śyāmārahasyam. Substance, country-made yellow paper, 14 × 3 inches. Folia, 53 (not marked by any number). Lines, 6–11 in a page (some pages having gap of about ½ inch square in the middle). Character, Bengali. Date, ? Appearance, old. Prose and verse. Generally correct. Incomplete.

An incomplete copy of Śyāmārahasyam, by Paramahaṁsa Pūrṇānanda, noticed in our catalogue Nos. 99, 100, Page 102, Vol. 17. This Ms. has no page marks, and pages are not arranged systematically, nor are the chapters given at the end of the colophon. So it has been very difficult to go through the Ms. On careful perusal we see that it contains upto the end of the seventeenth chapter.

पुस्तकेऽस्मिन् श्यामारहस्यस्य सप्तदशपरिच्छेदाः वर्त्तन्ते।

No. 102. श्रीजयदुर्गास्तवराजः। Śrījayadurgāstavarājaḥ. Substance, country-made yellow paper, 11 × 3 inches. Folia, 2. Lines, 6–8 in a page. Character, Bengali. Date, ? Appearance, fresh. Verse. Generally correct. Complete.

This codex contains the thirtyseventh chapter of Rudrajāmala dealing with a prayer to the Goddess Durgā, named Śrījayadurgāstavarāja.

Beginning. श्री दुर्गायै नमः। अथ रुद्रयामले।
उपविष्टं महात्मानं राघवीराद्य कथंग।
भूमिविमलमहीध्याने भूमहीतिविपतम् च।

End उत्तमाक्षरं स्तोत्रं दुर्लभं विद्धि शङ्करि।
एतस्य पाठात्त्रिपुरो महादेवेन घातितः॥
रावणो रघुनाथेन हतो युधि महाबलः।
हतश्च कंसः कृष्णेन स्तवस्यास्य प्रयोगतः॥

Colophon. इति पार्व्वतीश्वरसम्वादे रुद्रयामले सप्तत्रिंशत् पटलः॥ ३७॥ श्रीजयदुर्गास्तवराज(:) समाप्त(:)।

विवरणम्—पुस्तकेऽस्मिन् रुद्रयामलसप्तत्रिंशपटलीय श्रीजयदुर्गास्तवराजः सम्पूर्णो वर्त्तते।

No. 103. **श्रीदुर्गाशतनामस्तोत्रं।** Śrīdurgāśatanāmastotram. Substance, country-made yellow paper, 9 × 3 inches. Folia, 4. Lines, 4-8 in a page. Character, Bengali. Date, ? Appearance, old. Verse. Generally correct. Complete.

This codex contains a prayer to the Goddess Durgā with her hundred names mentioned in it, called Śrīdurgāśatanāmastotram, from the Muṇḍamālātantra, and an amulet to the Goddess, called Śrīdurgākavacam.

विवरणम् —पुस्तकेऽस्मिन् मुण्डमालातन्त्रोक्तं श्रीदुर्गाशतनामस्तोत्राभिधेयं श्रीदुर्गायाः स्तोत्रं तस्याः कवचं च वर्त्तते।

No. 104. **षट्कर्म्मदीपिका।** Ṣaṭkarmadīpikā. Substance, country-made yellow paper, 14 × 5 inches. Folia, 52, with two additional ones containing the index Lines, 8-11 in a page, with a gap of about 1½ in. × 1 in in the middle. Character, Bengali Date, ? Appearance, nearly fresh. Correct. Complete

A compilation from various Tantras on the six Karmas or rites of the Tantra, viz., (1) Śānti or cessation of troubles or remedy of diseases; (2) Vaśyatā or subjection of enemies, etc. (3) Stambhanam or suppression of the functions of a faculty by incantation. (4) Vidveṣaṇa or producing malice among friends. (5) Uccāṭana or banishing one from his own country or causing his ruin by incantations. (6) Māraṇa or killing or destroying an enemy. By Kṛiṣṇa Vidyāvāgīśa, complete in ten chapters.

Beginning. ओं गुरवे परमात्मने गणपतये नमः। अथ षट्कर्म्मदीपिका। ओं तत् सत्।

नत्वा देवीं नमस्कृत्य तथा त्रिपुरसुन्दरीं।
भद्रकालीञ्च देवेशीं तथा षट्कर्म्मदेवताम्।
श्रीकृष्णविद्यावागीशभट्टाचार्य्येण धीमता।
क्रियते विदुषां प्रीत्यै कृत्वा षट्कर्म्मदीपिका॥

क्रोधाक्रान्तां ज्वलनं वमन्तीं
दृष्टिं दधन्तीं दितिजं ग्रसन्तीम् ।
भीमं नदन्तीं प्रणमामि कृत्यां
वीक्ष्यमाणा सुघषोरकालीं ।
उन्मत्तभैरवीतन्त्रात् फेत्कारीडमरात् तथा ।
तथाच मालिनीतन्त्रात् तथा कालोत्तरादपि ।
सिद्धयोगेश्वरीतन्त्रात् योगिनीज्ञानसम्भवात् ।
सर्व्वतन्त्रात् समाकृष्य षट्कर्म्मविधिरुच्यते ।
पुस्तके लिखिता विद्या येन सुन्दरी जप्यते ।
सिद्धिर्न जायते देवि कल्पकोटिशतैरपि ।
गुरुं विनापि शास्त्रेऽस्मिन् नाधिकारः कथञ्चन ।
यथाभिधास्ये शास्त्रेऽस्मिन् सम्यक् षट्कर्मलक्षणं ।
सर्व्वतन्त्रानुसारेण प्रयोगफलसिद्धिदं ॥

षट्कर्म्मणां सर्व्वकालिकत्वमाह । स्मृतिः ।

नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ।
तथा तथैव कार्य्याणि न कालस्तु विधीयते ।
शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः ।
मारणान्तानि शंसन्ति षट्कर्म्माणि मनीषिणः ॥

This six karmas are thus defined:

रोगकृत्याग्रहादीनां विनाशः शान्तिरीरिता ॥ १ ॥
वश्यं जनानां सर्व्वेषां विधेयम् समुदीरितम् ॥ २ ॥
प्रवृत्तिरोधः सर्व्वेषां स्तम्भनं समुदाहृतं ॥ ३ ॥
स्निग्धानां द्वेषजननं मिथो विद्वेषणं मतं ॥ ४ ॥
उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम् ॥ ५ ॥
प्राणिनां प्राणहरणं मारणं समुदाहृतम् ॥ ६ ॥

End. अथ होमादिद्रव्यमाह ॥ ० ॥ तत्रैव ।

मोदकैः पृथुकैर्लाजैः सक्तुभिर्गुडपर्व्वभिः ।
नारिकेलैर्घृतैः पक्वैः सुपक्वैः कदलीफलैः ।

इति षट् द्रव्याणि ॥ ० ॥ * ॥ श्रीहरिः ॥ श्रीहरिः । श्रीदुर्गा ॥ श्रीदुर्गा ॥
श्रीदुर्गा ॥ श्रीदुर्गा ॥ ० ॥

We do not find any colophon just at the end of the Ms. There are 6 pages containing various other matters after the colophon :—

Colophon. इति श्रीकृष्णविद्यावागीशभट्टाचार्य्यात्मजनामानन्तसंकलिता षट्कर्मदीपिका दशमोद्देशः समाप्तः। १०। ओं तत् सत्। ओं शान्ति शान्ति शान्तिः। ओं गुरवे परमात्मने नमः। ओं गणपतये नमः। ओं काली ओं काली ओं काली। श्रीश्रीदुर्गा श्रीश्रीदुर्गा श्रीश्रीदुर्गा। ०। ओं ओं ओं। ओं शिवः ओं शिवः ओं शिवः। ओं रामः ओं रामः। ओं रामः। ०। श्रीश्रीगुरुदेव भरसा। श्रीश्रीदुर्गा भरसा। श्रीश्रीकाली भरसा।

विषयाः।—१। षट्कर्म्मणां सर्व्वकालिकत्वम्। षट्कर्मसंज्ञाकथनम्। षट्कर्मदेवताकथनम्। दिग्नियमकथनम्। वसन्ताद्यृतुनियमकथनम्। तिथिवारनियमकथनम्। नक्षत्रनियमः। पञ्चभूतादयः। रक्तादिवर्णभेदः। ध्यानप्रकार.। आसनम्। मन्त्रनियम.। मन्त्रज्ञानम्। मालानियमः। पल्लवमन्त्र। मन्त्रस्य योगनियमः। रोधमन्त्रनियमः। संपुटमन्त्र। विदर्भमन्त्रकथनम्। वश्यनादौ बीजादिनियमः। स्त्रीपुंनपुंसकमन्त्र। आग्नेयादिमन्त्रः। सुप्तप्रबोधमन्त्रादि। आसननियमः। षण्मुद्रानियमकथनम्। ध्याननियमः। स्थाननियमादि। कुण्डादिनियमः। वश्यादिकर्म्मणां महत्त्वम्। २। कलसस्थापनादि। रुद्रदेवीपूजननियमः। अवश्यनियमः।- पुनः स्नापकालादिकथनम्। जपमालानियमादि। शान्त्यादौ पूर्व्वमुखादिनियमः। वालिकादिजपनियम.। होमे कुण्डमुखादिनियमकथनम्। होमद्रव्यनियमकथनम्। वह्निजिह्वाकथनम्। अग्निनामानि। जपहोमसंख्यानामनुक्तौ अष्टोत्तरसंख्यानियमः। स्रुक्स्रुवनियमः। मृगीमुद्रादिमुद्रात्रयनियमः। नमः स्वाहादिनियम। ३। शान्तिकर्म्म। ज्वरशान्तिकथनम्। अथर्व्वणोक्तं ज्वरशान्तिकथनम्। षड्भुजाकालीध्यानम्। मृत्तिकाशिवपूजा। गृहस्थस्य लिङ्गद्वयादिपूजानिषेधकथनम्। लिङ्गमुद्राकथनम्। मुखवाद्यादिफलकथनम्। लिङ्गस्तवकथनम्। शिवपूजाप्रयोगः। शिवप्रसादभोजनविधिः। हारीतमुनिप्रोक्तज्वरशान्तिकथनम्। नक्षत्रादिनियमज्वरशान्तिकथनम्। ज्वरहरवलिमन्त्रः। ज्वरहरमन्त्रबन्धनम्। चण्डीपाठावृत्तिः। तत्फलकथनम्। चण्डीपाठक्रमः। त्र्यम्बकमन्त्रविधानकथनम्। त्र्यम्बकप्रयोगः। त्र्यम्बकमन्त्रवर्णन्यासः। मृत्युसञ्जीवनी विद्या। शूलरोगप्रतीकारः। गर्भजननप्रसवोपायः। निगडबन्धनमोचनम्। हस्तिकरणम्। आशीर्वादिरोगनिवारणमन्त्रः। ४। चिटिमन्त्रकामकलादिवशीकरणप्रकारः। ५।

वगलामुखीविषया स्तम्भनम्। वगलार्चनविधिः। वगलास्तुतिः। ६। हरिद्रागणेशघटितापरप्रकारस्तम्भनादिकथनम्। देवगन्धर्वादिनानाजीवानां स्तम्भनाकर्षणादिकथनम्। हरिद्रागणेशमन्त्रकथनम्। गणेशयन्त्रम्। ७। गणेशस्याकर्षणमन्त्रः। त्रिपुराप्रकरणे आकर्षणम्। कामनस्यायाकर्षणप्रकार.। विद्वेषणम्। ८। उच्चाटनम्। ९। मारणम्। अग्निध्यानम्। अग्निस्त्रीध्यानम्। दुर्गाध्यानम्। भद्रकालीध्यानम्। कृत पुरश्चरणस्य प्रयोगे अधिकारः। वश्यताकर्षणयोः अग्नेर्ध्यानं तत् स्त्रीध्यानञ्च। मारणे दुर्गाभद्रकालीध्यानकथनम्। त्र्यक्षरपञ्चककथनम्। १०। महिषमर्द्दिनीदशभुजाकालीपूजादि। तद्ध्यानम्। अनयोः पुरश्चरणम्। होमद्रव्यनियमः। महिषमर्द्दिनीकवचम्। महिषमर्द्दिनीस्यापरमन्त्रमविधानम्। अतिरिक्तविषयाः—हरिद्रागणेशकवचम्। गणेश स्तोत्रम्। गणेशध्यानानि। हरिद्रागणेशध्यानम्। होमद्रव्याणि।

विवरणम्—पुस्तकेऽस्मिन् श्रीकृष्णविद्यावागीशकृत षट्कर्मदीपिकाभिधेयः शान्तिवश्यतादिषट्कर्मविषयकतन्त्रनिबन्धः दशोद्देशसमेतः सम्पूर्णो वर्त्तते।

No. 105. संक्षेपनित्यपूजा। Saṁkṣepanityapūjā. Substance, country-made yellow paper, 10 × 3 inches. Folia, 6 Lines, 7–9 in a page. Character, Bengali. Date, Appearance, old. Prose. Correct. Incomplete.

A guide to the daily worship of the goddess Durgā, not complete.

Beginning. ओं नमः परदेवतायै। अथ संक्षेपनित्यपूजाप्रयोग.। तत्रादौ ओं आत्मतत्त्वाय स्वाहा ओं शिवतत्त्वाय स्वाहा इत्यनेनाचम्य द्वारदेशे सामान्यार्घं कुर्यात्।

End नास्ति।

Colophon. नास्ति।

विवरणम्—पुस्तकेऽस्मिन् श्रीदुर्गाया नित्यपूजापद्धतिरंशमात्रं विद्यते।

No. 106. सूर्य्यकवचम् । Sūryyakavacam. Substance, foolscap paper, 10 x 2½ inches. Folia, 2. Lines, 6-7 in a page. Character, Bengali. Date, ? Appearance, fresh. Verse. Not correct. Complete.

This codex contains an amulet to the god Sūryya from the Sāmbhavatantra.

Beginning. अथ सूर्य्यकवचं । ओं श्रीसूर्य्याय नमः ॥ श्रीशिव उवाच ।

सूर्य्यस्य कवचं देवि शृणुतां प्राणवल्लभे ।
रोगमात्रभयो यस्मात् कवचात् सिद्धिदायक ।

अस्य श्रीसूर्य्यकवचस्य ब्रह्म ऋषिस्त्रिष्टुप् छन्दो दिनेशदेवता दिनकरकवचपाठे विनियोगः ॥

End.

जवापुष्पैः समभ्यर्च्य सर्व्वरोगात् प्रमुच्यते ।
धारयेद्दक्षिणे हस्ते तस्य रोगो न जायते ॥

Colophon. ओं इति श्रीशाम्भवतन्त्रे देवीश्वरसम्वादे श्रीसूर्य्यकवचं समाप्तं । ओं तत् सत् ॥ ओं

यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
पूर्णंभवतु तत् सर्व्वं त्वत्प्रसादाद्दिवाकर ॥
ओं जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिं ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

इति सूर्य्यदेवं प्रणमेत् ॥

विवरणम्—पुस्तकेऽस्मिन् श्रीशाम्भवतन्त्रोक्तं सूर्य्यकवचं विद्यते ।

No. 107. सूर्य्यकवचम् । Sūryyakavacam. Substance, country-made reddish paper, consisting of two folias, one 9 x 2 inches, the other 15 x 2 inches. Lines, 4-7 in a page. Character, Bengali. Date, ? Appearance, old. Verse. Generally correct. Complete.

This codex contains an amulet of the god Sūryya, from the Brahmajāmalatantra, named Trailokyamaṅgala.

अथ श्रीसूर्य्यकवचम्। श्रीसूर्य्य उवाच।

साम्ब साम्ब महाबाहो शृणु मे कवचं शुभम्।

त्रैलोक्यमङ्गलं नाम कवचं परमाद्भुतम्॥

End. धृत्वा कवचं दिव्यं जपेत् सूर्य्यमनुत्तमम्।

सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि॥

Colophon. इति ब्रह्मयामले त्रैलोक्यमङ्गलं नाम श्रीसूर्य्यकवचं समाप्तम् श्री तत् सत्॥

विवरणम्—पुस्तकेऽस्मिन् श्रीब्रह्मयामलोक्तं त्रैलोक्यमङ्गलाभिधेयं सूर्य्यकवचं वर्त्तते।

No. 108. स्त्रीगुरुगीता। Strīgurugītā Substance, country-made yellow paper, 10 × 2½ inches. Folia, 4. Lines, 5-6 in a page Character, Bengali. Date, ? Appearance, nearly fresh Verse. Generally correct. Complete.

This codex contains the Dhyāna (meditation), Stuti (prayer) Kavaca (amulet) and Gītā (eulogies) of a female Guru or spiritual leader, taken from the Mātṛikābhedatantra.

अथ स्त्रीगुरुध्यानम्।

सहस्रारे महापद्मे किञ्जल्कगणशोभिते।

प्रफुल्लपद्मपत्राक्षी घनपीनपयोधरा।

प्रसन्नवदना क्षीणमध्या ध्यायेच्छिवां गुरुं।

पद्मरागसमाभासां रक्तवस्त्रसुशोभनां।

रत्नकङ्कणपाणिञ्च रत्ननूपुरशोभितां।

शरदिन्दुप्रतीकाशवक्त्रोद्भासितकुण्डलां।

स्वनाथवामभागस्थां वराभयकराम्बुजां।

इति ते कथितं देवि स्त्रीगुरोर्ध्यानमुत्तमं।

गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन॥

End. पार्वत्युवाच।

कीदृशं कथ्यतां देव गुरुगीता मयि प्रभो।

श्रीभगवानुवाच ।

अथ तारिणि वच्यामि गीतां ब्रह्ममयीं पराम् ।
गुरुस्त्वं सर्व्वशास्त्राणामहमेव प्रकाशकः ।
त्वमेव गुरुरूपेण लोकानां त्राणकारिणी ।
गयागङ्गाकाशिका च त्वमेव सकलं जगत् ।
कावेरी यमुना रेवा करतोया सरस्वती ।
गोमती चन्द्रभागा च त्वमेव कुलपालिके ।
ब्रह्माण्डं सकलं देवि कोटि ब्रह्माण्डमेव च ।
नहि ते वक्तुमर्हामि क्रियासारं महेश्वरि ।
उक्ता गीतां भावयित्वा भिक्षुकोऽहं नगात्मजे ।
कथं त्वं जननी भूत्वा वधूस्त्वं मम देहिना ।
तव चर्ण्णं महेशानि पतीतं परमात्मनि ।
इति ते कथिता गीता गुरुदेवस्य ब्रह्मणः ।
संक्षेपेण महेशानि प्रभुरेव गुरुः स्वयं ।
जगत् समस्तमास्थाय गुरुस्त्वेको हि केवलं ।
इति तं तोषयित्वा च नुतिभिस्तुतिभिस्तथा ।
नानाविधद्रव्यदानैः सिद्धः स्यात् साधकोत्तम. ॥ ४ ॥

Colophon इति श्रीगुरुगीता समाप्ता ॥ + ॥

विवरणम—पुस्तकेऽस्मिन् मातृकाभेदतन्त्रोक्तश्रीगुरुध्यानस्तुतिगीताकवचानि वर्त्तन्ते ।

No. 109. होमप्रयोगः । Homapiayogaḥ. Substance, country-made yellow paper. 8 x 3 inches. Folia, 2. Lines, 11-12 in a page. Character, Bengali. Date, ? Appearance, old Prose. Correct. Complete.

This codex contains the Tāntrika process of Homa or oblation to the fire, with the mystic diagram in the margin.

उदगपाश्रितानि रेखाः तत्र मार्गेषु ओँ मुकुन्दाय नमः एवं ईशानाय, पुरन्दराय इति अंगुष्ठ उदगग्रेषु ओँ ब्रह्मणे नमः एवं वैवस्वताय, इन्दवे प्रागादिक्रमोऽन्येन पूजयेत्।

End. ततो मूलेन पूर्णाहुतिं दत्त्वा संहारमुद्रया खेटदेवता उदयमागीय यमस्येति विसृज्य दक्षिणां दत्त्वाच्छिद्रावधारणं कुर्यात्।

Colophon. इति समाप्तम्॥

विवरणम्—पुस्तकेऽस्मिन् तान्त्रिकहोमप्रयोगो वर्णमन्तरं वर्तते।

TANTRA SUPPLEMENT.

No. 110. तत्त्वसारः। Tattvasārah. Substance, country-made *yellow paper and foolscap blue paper, 12 × 2½ inches. Folia, 7 (of which 6 being yellow and 1 blue). Lines, 3–8 in a page. Character, Bengali. Date, ? Appearance, nearly fresh. Verse Generally correct. Complete.*

This work deals with the Paramatattva or Supreme knowledge in the form of a dialogue between Mahādeva and Kārtikeya; by Kamalākara Bhatta, son of Rāmakrisna Bhatta, grandson of Nārāyana Bhatta.

Beginning. श्रीश्रीइष्टदेवता॥ अथ तत्त्वसारः। ओँ गुरवे नमः।

कैलासपृष्ठे सुखासीनं देवदेवं जगद्गुरुं।
प्रणम्य शिरसा भूमौ स्कन्दो वचनमब्रवीत्॥ १।
श्रुतितेऽस्मिन् त्वया नाथ अनेकैः शास्त्रकोटिभिः।
मन्त्रविद्यान्तरे घोरे मग्नोऽस्मि व्याकुलीकृतः॥ २।
तत्त्वसारं न जानामि बधितोऽस्मि त्वया प्रभो।
साक्षात् सारतरं गुह्यं हेतुदृष्टान्तवर्जितम्। ३।
कथयस्व महादेव यदि चास्ति दया मयि।
श्रुत्वा वाक्यं कुमारस्य प्रहृष्टो भगवान् शिवः॥ ४॥

End. देवेश त्वत्प्रसादेन मुक्तोऽहं भवसागरात् ।
अद्य मे सफलं जन्म अद्य मे सफलं तपः । ११९ ।
अद्य मे सफला भक्तिरद्य तीर्णो भवार्णवात् ।
अद्य तीर्णं पुनर्जन्म देव पृच्छाम्यहं पुनः ।
यदा प्रदीपे सम्प्राप्ते तमो नष्टं गृहोदरे । १२० ॥

Colophon. इति महादेवकार्त्तिकेयसम्वादे तत्त्वसारं समाप्तम् ॥ + ।

विवरणम्—पुस्तकेऽस्मिन् महादेवकार्त्तिकेयसम्वादे तत्त्वसाराभिधेय. परमतत्त्वविषयको निबन्धो वर्त्तते ।

PHILOSOPHY.

VEDĀNTA MANUSCRIPTS.

No. 1. **अथर्व्वशिखोपनिषद्।** Atharvaśikhopanisad. Substance, country-made white paper, 8 x 3 inches. Folia, 4. Lines, 4–6 in a page. Character, Bengali. Date, ? Appearance, fresh Prose. Generally correct. Complete.

An Upaniṣad belonging to the Atharvaveda, entitled Atharvaśikhopaniṣad.

Beginning. अथाथर्व्ववेदीयाथर्व्वशिखोपनिषद्। अथ हैनं पिप्पलादोऽङ्गिरा सनत्कुमारश्चाथर्व्वाणमुवाच ॥ १ ॥
भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किन्तद्ध्यानं को वा ध्याता को वा ध्येय इति। २ ॥

End. कृत्स्नमोङ्कारगतिलं सर्व्वध्यानयोगज्ञानानां फलमोङ्कारो वेद। पर ईशान वा शिव एको ध्येयः शिवङ्कर. सर्व्वमन्यत् परित्यज्येति। ३० ॥ समास्ताथर्व्वशिखा एतामधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यते इति सदोमन्यमिति।३१

Colophon. समाप्तचेयमथर्व्वशिखोपनिषत्सहितेति।

विवरणम्—पुस्तकेऽस्मिन् अथर्व्ववेदीयाथर्व्वशिखोपनिषत सम्पूर्णा वर्त्तते।

No. 2. **अथर्व्वशिर उपनिषत्।** Atharvasira Upaniṣat Substance, country-made white paper, *8 x 3 inches* *Folia, 6.* *Lines, 3–6 in a* page. Character, Bengali. Date, ? . Appearance, nearly fresh Generally correct *Incomplete.*

One of the modern Upanisads of the Atharvaveda, entitled Atharvasira Upanisad.

Beginning. अथ अथर्व्ववेदीय अथर्व्वशिर उपनिषत्। ओँ देवा ह वै स्वर्गलोकमगमन् ते देवा रुद्रमपृच्छन् को भवान् इति। १

End. नास्ति ।

Colophon *at the end of the second chapter.*

इति अथर्व्वशिर उपनिषदि द्वितीयोऽध्यायः ।

विवरणम्—पुस्तकेऽस्मिन्नथर्व्ववेदीया अथर्व्वशिर-उपनिषत् असम्पूर्णा वर्त्तते ।

No. 3. **आत्मबोधटीका ।** Átmabodhatīkā. Substance, foolscap paper, $10\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 17. Lines, 5-7 in a page. Character, Bengali Date, ? Appearance, fresh Prose Generally, complete. Complete

A commentary on Śankarācāryya's Ātmabodha, by Madhusūdana Sarasvati.

Beginning. श्री नमो दुर्गायै तत्र भगवान् शङ्कराचार्य्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्म्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहाय वेदान्तसिद्धान्तसंग्रहमात्मबोधं दिदर्शयिषुः प्रतिजानीते तपोभिरिति कृच्छ्रचान्द्रायणनित्यनैमित्तिकानुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यन्तःकरणदोषा येषां तेषां नित्यनैमित्तिकैरेव कुर्व्वाणो दुरितक्षयमिति वचनात् ।

End. दिग्देशकालाद्यतीतं यो विनिश्चित्य. परमहंसः आत्मनः तीर्थं भजते सर्व्ववित् सर्व्वज्ञ सर्व्वगः परमात्मस्वरूपत्वात् अमृतयुक्तो भवेत् कथं भूत आत्मतीर्थं दिग्देशकालाद्यनपेक्षैरसर्व्वगतं शीतादिद्वन्द्वदुःखानि हरतीति शीतादिहृत् नित्यसुख मोक्षानन्दप्रापकत्वात् इतरतीर्थेषु तद्विपरीतं द्रष्टव्यं तस्मादात्मतीर्थं स्नातस्य न किञ्चिदवशिष्यते इति भावः ।

Colophon. इति आत्मबोधटीका सम्पूर्णा ।

विवरणम्—पुस्तकेऽस्मिन् श्रीमच्छङ्कराचार्य्यकृतात्मबोधस्य श्रीमन्मधुसूदनसरस्वतीकृतटीका सम्पूर्णा वर्त्तते ।

The codex also contains three pages in the beginning containing the Rāmatāpaniya, a work on the divinity of Rāmacandra. The work being incomplete, we do not think it necessary to describe it.

No. 4. ईशावास्यप्रश्न-मुण्डक-तैत्तीरीय-छान्दोग्योपनिषदः । *Iśāvāsyapraśna-Muṇḍaka-Taittirīya-Chāndogyopaniṣadaḥ.* Substance, country-made yellowish paper, $9\frac{1}{2} \times 3$ inches Folia, 62. Lines, 3–15 in a page. Character, Bengali Date, 1609 Śaka Appearance, old Prose and verse. Generally correct. Complete.

The codex contains only the text of six Upaniṣads, viz. Iśāvāsya, Praśna, Aitareya, Muṇḍaka, Taittirīya, Chāndogya, of which the first belongs to the White Yajurveda, already described in our Appendix; the third belongs to the Atharvaveda; described in No. 181, Vol. 2; the fourth belongs to the *Black Yajurveda*, described in *No. 147, Vol. 2*; and the fifth belongs *to the Atharvaveda; described in Nos.* 155-56-57-58-59, Vol. 2 of the Descriptive Catalogue of the Sanskrit College Library. The Second Praśnopaniṣad belongs to the Śaunaki Śākhā of the Atharvaveda and the third Aitareya belongs to the Ṛigveda. These two being not described in our Catalogue before, a short description is given below :—

Beginning *of Praśnopaniṣad.* सुकेशा च भरद्वाजः शैब्यश्च सत्यकामः सौर्य्यायणीय गार्ग्यः ।

End. त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति नम परमर्षिभ्यो नमः परमर्षिभ्यः ॥

Colophon. इत्यथर्ववेदे शौनकीशाखायां प्रश्नोपनिषत् समाप्ता । ओं शान्तिः ।

Beginning *of Aitareyopaniṣad.* ओं नमो विश्वेश्वराय । आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् ।

End. अवीरावाम् संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारं अवतु वक्तारम् ।

Colophon. इत्यारण्यके द्वादशोऽध्यायः ।

The colophon at the end of the Chāndogyopaniṣad runs thus—

इति सामवेदे छान्दोग्यसंज्ञकोपनिषत्सु ब्रह्मविद्यायाम् अष्टमः प्रपाठकः समाप्तः ॥ ० ॥ श्रीं तत्सत् ॥ हरि ओं सम्पूर्णा छान्दोग्योपनिषत् ॥ ओं हरि ओं ॥

छान्दग्योपनिषत् काश्यां हरचन्द्रामशर्म्मणा ।
षड्वसुर्तुविधौ शाके व्यलेख्यात्मबुभुत्सया ॥

श्रीमुकुन्दरामदेवशर्म्मणः स्वाक्षरमिदं तत् पुस्तकञ्च । शकाब्दंमन्तु ।

It shows that the Ms. was copied by one Mukundaram Sarma of Benares, in Saka 1609, to whom it belonged.

विवरणम्—पुस्तकेऽस्मिन् ईशाकाठप्रश्नमुण्डकतैत्तिरीयछान्दोग्यनामधेयाः षट् उपनिषदः वर्त्तन्ते ।

No. 5. **केनोपनिषद्भाष्यम् ।** Kenopaniṣadbhāṣyam. Substance, country-made yellow paper, 10 × 4 inches. Folia, (29 + 21) 50. Lines, 3–8 in a page. Character, Bengali. Date, ? Appearance, nearly fresh. Prose. Not correct. Complete.

This codex contains the complete Bhāsya of the Kenopanisad, by Śankarācaryya.

Beginning *of Bhasya of sentences.* श्रीश्रीनारायणः । अथ वाक्यभाष्यं लिख्यते । समाप्तं कर्म्मात्मभूतप्राणविषयं विज्ञानं कर्म्म चानेकप्रकारं । ययोर्विकल्पसमुच्चयानुष्ठानात् दक्षिणोत्तराभ्यां सृतिभ्यामावृत्त्यनावृत्ती भवतः अत ऊर्द्ध्वं फलनिरपेक्षज्ञानकर्म्मसमुच्चयानुष्ठानात् कृतात्मसंस्कारस्योच्छिन्नात्मज्ञानप्रतिबन्धकस्य द्वैतविषयदोषदर्शिनो निर्ज्ञाताशेषबाह्यविषयत्वात् संसारबीजमज्ञानमुच्चिच्छित्सतः प्रत्यगात्मविषयजिज्ञासोः. केनेषितमित्यात्मस्वरूपतत्त्वविज्ञानाय अयमध्याय आरभ्यते ।

End *of the Bhasya of sentences*

अनन्तेऽपारे अविद्यमानान्ते स्वर्गलोके सुखे निर्दुःखात्मनि परे ब्रह्मणि ज्येये महति सर्व्वमहति सर्व्वमहत्तरे प्रतितिष्ठति सर्व्ववेदान्तवेद्यं ब्रह्मात्मत्वेनावगम्य तदेव ब्रह्म प्रतिपद्यते इत्यर्थः ॥ + + ॥

Colophon *of Bhasya of sentences.* श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्कृतौ तलवकारशाखोपनिषत्पदगणे वाक्यविवरणं समाप्तम् ॥

तं नौमि शङ्करं ज्ञानरूपिणं परमेश्वरं ।
अद्वैतं परमात्मानं भक्त्या परमया सकृत् ॥ + ।

श्रीकृष्णचन्द्रे मतिरस्तु नित्य-
मस्मद्विधानामचला हि निन्ये।
न किञ्चिदस्मात् परमाप्ततत्त्व-
ज्ञानं कदाचित् वयमर्थयाम ॥ १ ॥ + ।

Beginning *of the Bhasya of words.* ओं नमो विश्वेश्वराय॥ केनेषितमित्याद्योपनिषत् परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारम्भः। प्रागेतस्मात् कर्म्माण्यशेषतः परिसमापितानि समस्तकर्म्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि।

End *of the Bhasya of words.* अनन्तशब्द औपचारिकोऽपि स्यादित्यत आह ज्ये इति ज्ये ज्यायसि सर्व्वमहत्तरे स्व आत्मनि मुख्य एव प्रतिष्ठति न संसारं मापद्यत इत्यभिप्रायः ॥ ● ॥

Colophon *of the Bhasya of words* इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीशङ्करभगवतकृतौ पदभाष्यं संपूर्णं ॥ ओं शान्तिः ओं शान्तिः ओं शान्तिः ॥

विवरणम्—पुस्तकेऽस्मिन् परमहंसपरिव्राजकाचार्य्यविरचिते केनोपनिषदः पदवाक्यभाष्ये सम्पूर्णे वर्त्तते।

No. 6. **छान्दोग्योपनिषद्।** Chāndogyopaniṣad Substance, country-made colourless paper, $10 \times 3\frac{1}{2}$ inches. Folia, 11. Lines, 7-13 in a page (some of the pages having a gap of nearly $1\frac{1}{2}$ in. $\times \frac{1}{2}$ in. in the middle). Character, Bengali. Date, ? Appearance, old. Prose. Generally correct. Complete.

An Upaniṣad of the Sāmaveda described in Nos. 155-56-57-58-59, Vol. 2, of the Descriptive Catalogue of the Sanskrit Mss. of Sanskrit College Library.

विवरणमुक्तपूर्व्वम्।

No 7. न्यायनिर्णयव्याख्या। Nyayanirnayavyakhya. Substance, country made colourless paper, 13×4 inches. Folia, 39. Lines, 1-14 in a page Character, Bengali. Date, ? Appearance, old. Prose Generally correct. Not complete

A commentary on Sankaracaryya's Sariraka Bhasya of the Vedantasutra of Vedavyasa, named Nyayanirnaya, by Anandagiri.

Beginning. ओं तत् सत्। ओं नमो गणेशाय।

अव्यक्ताव्ययपूर्व्वगम्यधिगतेर्याप्यनुमानास्पदं
तत्त्वं लक्षणभेदतः श्रुतिगतं निर्धूतमाध्यार्थकं।
आम्नायान्तविभासमर्थ्यविभव सर्व्वाविरुद्ध पदं
सत्यज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा॥१॥
यो लोकं सकलं पुनाति निगमा यं प्राहुरेकान्ततो
व्याप्तं यत्र जगज्जगन्ति सततं यस्मै नमस्कुर्व्वते।
यस्मादाविरभूदशेषममरा यस्य प्रसादार्थिनो
यस्मिन् पर्य्यवसास्यति स्फुरदिदं तस्मै नमो विष्णवे॥२॥
योऽनुपानुपुनजा जनयति सकलामालयं यं लभन्ते
सर्व्वे निर्व्वान्ति येन श्रुतिपथपथिका दीपहातन्न च।
यस्मै यस्मादकस्मात् परिभवचकिता यस्य चरीचयन्ते
चिन्ता यस्मिन् प्रवृत्ता भजविशदधियः सञ्चरे तं गिरीशम्॥३॥
विद्यानमिताखि दुरासदानि प्रत्यूहवर्गप्रभवानि तानि।
राजाननमाश्रितपरम्परायामाराद्रुपासे गिरिजाभिजातम्॥४॥
श्रीसच्चिदानन्दपयोनिधिर्निधिरसौ मत्वाक्तिपङ्क्तिस्फुर
न्मुक्तानामनवद्यहृद्यविपुलप्रद्योतितिविद्यामणि।
भान्ति शान्तिधृतो दधीति सरितामकालनिशान्ति भु-
र्भूयास्म सततं मुनीन्द्रमकरश्रेणिस्थय श्रेयसे॥५॥
यद्वाप्याम्बुजजातमधुरप्रेयोऽमधुप्रार्थना
न्यायव्याधय. समयमकृत स्वर्गेऽपि निर्व्वेदिन.।
यस्मिन् मुक्तिपथो मुमुक्षुमुनिभि समर्थित. सदभौ
तस्मै भाष्यकृते नमोऽस्तु भगवत्पादाभिधां बिभ्रते॥६॥
यत्पादाम्बुजचञ्चरीकधिषणा निर्व्वापमागांधीना
पङ्क्तिर्मुक्तिसर्गदुर्गदुरिता वाचयमानामिव।
यच्चित्रमिदं प्रमादि सममूढोऽभाद्रौ न यत
यज्ञानन्दगुरुश्वराय गुरवे तस्मै परस्मै नमः॥७॥

मातर्नमामि भवतीमथ प्रार्थये त्वां
चेतः सरस्वति परास्य परार्थमर्थे ।
शारीरके मदनुयद्दसमर्थ-
मेकायमस्तु वचसा सह सम्यगर्थे ॥ ८ ॥
श्रद्धाभक्ती पुरोधाय विधायागमभावनां ।
श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयम् ॥ ९ ॥

नित्याध्ययनविध्युपादापितवेदान्तवचोभिरापाततः प्रतिपन्न मास्तारभौपाधिकं मनुबन्धजातं न्यायतो निर्णेतुं भगवान् बादरायणः सूत्रितवानथातो ब्रह्मजिज्ञासेति ।

End. नास्ति ।

Colophon. नास्ति ।

विवरणम्—पुस्तकेऽस्मिन् वेदव्यासकृतवेदान्तसूत्रे शङ्कराचार्यकृतशारीरकभाष्यस्य श्रीमदानन्दगिरिप्रणीता न्यायनिर्णयाख्यव्याख्यासम्पूर्णा वर्त्तते ।

No. 8. माण्डुक्योपनिषद्, ब्रह्मोपनिषद् । Māṇḍukyopaniṣad, Brahmopaniṣad. Substance, country-made yellowish paper, 9½ × 4 inches. Folia, 11 (of which pages 10 belong to the Māṇḍukya and one to the Brahmopaniṣad). Lines, 6–17 in a page. Character, Bengali Date, ? Appearance, old. Prose and verse Generally correct. Complete.

This codex contains the texts only of two Upaniṣads (1) Māṇḍukya, (2) Brahma. The former being already described, we need not give any detail of it.. The latter only which is an Upaniṣad on Brahma, belonging to the Atharvaveda, is briefly described below.

Beginning *of Bramhopanisad.* चथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति । नाभि हृदयं कण्ठ मूर्द्धा च । तत्र चतुष्पादं ब्रह्म विभाति जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्ते रुद्रः तुरीयमक्षरम् ।

End. आत्मविद्यातपोमूलं तत् ब्रह्मोपनिषत् पदं तद् ब्रह्मोपनिषत्पदं । ० ।

Colophon . इति ब्रह्मोपनिषत् ॥

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ॥

विवरणम्—पुस्तकेऽस्मिन् अथर्ववेदीया माण्डूक्योपनिषत् ब्रह्मोपनिषच्च सम्पूर्णा वर्त्तते ।

No 9 बृहदारण्यकोपनिषद् । Vrihadāranyakopaniṣad Substance country made colourless paper 10 × 4 inches. Folia 28 Lines 14 16 in a page Character Bengali Date ? Appearance, old Prose Generally correct Not complete

An Upanisad of the White Yajurveda described in No 136 of the Descriptive Catalogue of the Sanskrit Mss of Sanskrit College Library

विवरणनुक्तपूर्व्वम्

No 10 वेदान्तसारटीका सुबोधिनी । Vedantasāratīkā Subodhini Substance country made yellow paper 13 × 4 inches Folia 53 Lines, 7–8 in a page Character, Bengali Date 1510 Śaka Appearance nearly fresh Prose Not correct Complete

The famous commentary on the Vedantasara, by Nrisimha Sarasvati, entitled 'Subodhini , described in No 132, Page 81, Vol III of the Descriptive Catalogue of Sanskrit College Library

विवरणनुक्तपूर्व्वम्

No. 11. श्रीभगवद्गीतादीपिका । Śrībhagavadgītādīpikā. Substance, country-made yellow paper, 14 × 6 inches. Folia, 254. Lines, 3-11 in a page. Character, Bengali. Date, ? Appearance, nearly fresh. Prose. Generally correct. Complete.

This codex contains the commentary on Śrībhagavadgītā, entitled Gūḍhārthadīpikā, by Śrīmadhusūdana Sarasvatī.

पुस्तकेऽस्मिन् गूढार्थदीपिका नाम श्रीमद्भगवद्गीताटीका सम्पूर्णा वर्त्तते ।

No 12. श्रीमद्दक्षिणकालिकोपनिषत् । Śrīmaddakṣiṇakālikopaniṣat. Substance, country-made colourless paper, 17 × 3½ inches. Folia, 2. Lines, 6-9 in a page. Character, Bengali. Date, 8th Jyaistha, year not mentioned. Prose and verse. Not correct. Complete.

A very modern Upaniṣad belonging to the Atharvaveda, on the divinity of Dakṣiṇakālikā, named Śrīmaddakṣiṇakālikopaniṣat, copied by one Sambhunāth Śarma.

Beginning. श्रीकाली जयति ।
ओं अथैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां त्रिगुणां । सुभगा तु
कामरेफेन्दिरा बिन्दु मेलनरूपा समष्टिकारिणी ।
एतत्त्रिगुणिताभादौ तदनुकूर्चद्वय ।
कूर्चबीजन्तु रौमषष्ठस्वरबिन्दुमेलनरूपम् ।

End. गुह्यतममपि प्रियाय सत्कुलीनाय विद्याभक्ताय शुश्रुषवे स्त्रियं स्पृष्ट्वा स्वयं
परिपूज्य निशायां विहरेदेकाकी । प्रियतरेऽपि मया तदहं वा जया दद्यात् ।
ओं ओं ओं सत्यं सत्यं सत् सत् ।

Colophon. इत्याथर्वणिके सौभाग्यकाण्डे श्रीमद्दक्षिणकालिकोपनिषत् समाप्ता ॥ +
ज्यैष्ठस्याष्टमदिवसीया लिपिरियं श्रीशम्भुनाथशर्मणः स्वाक्षरमिदम् ।

विवरणम्—पुस्तकेऽस्मिन् अथर्वीया श्रीमद्दक्षिणकालिकोपनिषत् वर्त्तते ।

No. 13. सभाष्येशावास्योपनिषत्। Sabhāsyeśāvāsyopaniṣat Substance, country made yellow paper, 10 × 4 inches Folia, 13. Lines, 6-8 in a page. Character, Bengali. Date, ? Appearance, fresh. Prose Generally correct. Complete.

This codex contains the text of the Isopanisad of the Vājasaneya-saṁhitā of the White Yajurveda with its Bhāsya, by Sankarācāryya, systematically arranged, the text being followed by its commentary. Described in No. 174, 175, Vol. 2, of the Descriptive Catalogue of the Sanskrit Manuscripts of the Sanskrit College Library.

पुस्तकेऽस्मिन् श्रीमत्परमहंसपरिव्राजकाचार्य्यशङ्कराचार्य्यकृतभाष्यसहिता ईशोपनिषदस्ति।

No 14 हस्तामलकस्तोत्रम्। Hastāmalakastotram. Substance, country-made yellow paper, 11 × 4 inches Folia, 1. Lines, 6-13 in a page. Character, Bengali Date, ? Appearance, old, worn out Verse. Generally correct. Complete.

A work containing sixteen lines in the form of a dialogue between Sankarācāryya and his pupil Hastāmalaka, on the principles of Vedānta Philosophy, entitled Hastāmalakastotram, by Sankarācāryya.

Beginning. ओँ नमो ब्रह्मणे।

कस्त्वं शिशो कस्य कुतोऽसि गन्ता
किं नाम ते त्वं कुत आगतोऽसि।
एतन्मयोक्तं वद चार्भक त्वं
मत्प्रीतये प्रीतिविवर्द्धनोऽसि। १

End यथा वेद इहैव नै सुनकादौ
हदा बुद्धिरुत्पद्यते सूतकादौ
हदा बुद्धिरुत्पद्यते सूतकेति।
तथा वेदवेद्यं विषडात्मतत्त्वं
स्वकीयं गृहीतं विवादः कथं ते। १६

Colophon. इति हस्तामलकस्तोत्रं समाप्तम्।

विवरणम्—हस्तामलकस्तोत्रनामकोऽयं शङ्कराचार्यहस्तामलकयोः प्रश्नोत्तरच्छलेन शङ्कराचार्यकृतः सुप्रसिद्धवेदान्तनिबन्धः।

NYĀYA MANUSCRIPTS.

No. 1. **भावार्थदीपिका।** Bhāvārthadīpikā. Substance, country-made white paper, 14 × $4\frac{1}{2}$ inches. Folia, 140 (of which the first one is wanting). Lines, 4-11 in a page Character, Nāgara. Date, Saṁvat 1745. Appearance, very old, worn out, writings obliterate in parts. Prose. Not correct. Complete (excepting the first page).

A commentary on Tarkabhāsā, a brief treatise on the Nyâya Philosophy, by Keśava Miśra based on Gautama's Nyāyasūtra and on Nyāyabhāsya, entitled Bhāvārthadīpikā, by Mahāmahopādhyāya Gourikānta Bhattācāryya.

Beginning. नास्ति।

End. तेषां वादजल्पयोरेवानपेक्षितत्वात् वितण्डायिनान्तु गुरुणा सतीर्थ्येन वा सह वादकथायामेव अधिकाराद्वाव्युत्पत्त्यर्थमेतास्य ग्रन्थस्य कृतत्वादिति भावः।
एतदेव दर्शयति एतावतैवेत्यादिना।

ई धीरास्तर्कभाषायां न कर्त्तव्यावधीरणा।
शास्त्रार्थः सर्व्व एवात्र सूत्रवद्दिश्यते यतः॥
नावज्ञेया तर्कभाषा बालकैर्दूष्यते यदि (इति)
वानरैर्लङ्घितो(घ्यो)ऽपि नागाध(स्थः ?) (हि) महोदधिः।
अन्येषामपि संवि(वी)क्ष विवृती सम्यग्विभाव्याकरं।
मात्सर्य्यं( ) मनसा विहाय कलये व्याख्यां मदीयामपि।
भावार्थः (?) प्रतिसदधाति हृदये कोऽपीह धीरो यदि
स्यादेवास तदा विनिर्म्मितिविधावार्य्येभियार्थं श्रमः।
दिपाठयिषता बाला(न्) (शिष्या) ना (वा ?) मिश्रकान्तया।
गौरीकान्तेन धीरेण कृता भावार्थदीपिका॥

Colophon. इति श्रीमहामहोपाध्यायगौरीकान्तभट्टाचार्यविरचिता भावार्थदीपिका समाप्ता ॥ छ ॥ संवत् १७४५ समये पौषशुद्धदशमीभौमवासरे काशीक्षेत्रे लिखितं कर्णाटकमागेश्वभट्टेन ।

विवरणम्—पुस्तकेऽस्मिन् महामहोपाध्यायगौरीकान्तभट्टाचार्यविरचिता भावार्थदीपिका नाम केशवमिश्रकृततर्कभाषाया व्याख्यानं वर्त्तते ।

No. 2. **भाषापरिच्छेदः ।** Bhāṣāparicchedaḥ. Substance, foolscap paper, 12 × 3½ inches. Folia, 7 (one of them being larger than the rest). Lines, 7–12 in a page, with marginal notes in some pages. Character, Bengali. Date, the 21st Bhādra, 1282 Bengali era. Appearance, old. Verse. Correct. Complete.

This codex contains Bhāsāpariccheda, an elementary work on the Nyāya Philosophy, by Viśvanātha Pañcānan, son of Mahāmahopādhyāya Vidyānivāsa Bhaṭṭācāryya, with a short commentary by the same.

पुस्तकेऽस्मिन् संक्षिप्तटीकासमेतः महामहोपाध्यायविद्यानिवासभट्टाचार्यसुतश्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितभाषापरिच्छेदः सम्पूर्णो वर्त्तते।

From the colophon of the Ms. we find that it was copied by one Sāradācaran Kavirāj, at 11 a.m., on the 21st Bhādra in the Bengali era 1282.

No. 3. **वादार्थदर्पणम् ।** Vādārthadarpanam. Substance, country made yellow paper, 16 × 4 inches. Folia, 6. Lines, 6 in a page. Character, Bengali Date, ? Appearance, old. Prose Generally correct. Not complete.

This codex contains only a few pages of Vādārthadarpana, a book on the dissertations of logical controversies, by Rājavallabha Kavirāj.

Beginning. श्रीश्रीदुर्गायै नमः ।

वादार्थवादसततक्रिययानुमाने-
रौपम्ययुक्तिनिवहैः खलु तत्वमीर्षं ।
सौमं विशोकमरचन्तु भजे निदान-
मुत्पत्त्यवस्थितिलये जगतामनीशं ।
सद्वादमार्गपदसाधनमुक्तितानां
वादार्थदर्पणमिमं तनुते प्रियूना
बोधाय तत्त्वगणसिद्धूपकारकं तत्
व्याख्य सारनिकरं बरकागमाल्यैः ।
भवति वादनिर्वेशेन यदर्थोऽस्य न बुध्यते ।
वचनपरिपाल्येन प्रियभिर्गृह्यते सुखम् ॥
वादः परस्परेणोक्तं विग्रह्य शास्त्रपूर्वकं ।
त्रिविधः स च जल्पश्च वितण्डा च विधीयते ॥

End. नास्ति ।

Colophon at the end of the first chapter—

इति श्रीराजवल्लभकविराजकृत वादार्थदर्पणे प्रथमप्रकरणे द्रव्यादिपदार्थ-
निरूपणं नाम प्रथमालोकः ।

विवरणम्—पुस्तकेऽस्मिन् श्रीराजवल्लभकविराजकृतस्य वादार्थदर्पणस्यांशमात्रं वर्त्तते ।

SĀNKHYA MANUSCRIPTS.

No. 1. साङ्ख्यकारिकाभाष्यम् । Sānkhyakārikābhāṣyam Substance, country-made colourless paper, 13×7 inches. Folia, 39. Lines, 9-10 in a page. Character, Bengali. *Date*, ? *Appearance*, old Prose. Generally correct. Complete.

A Bhāṣya on the Sānkhyakārikā of Iśvara Kṛṣṇa, by Vijñāna Bhikṣu.

Beginning. ओँ नमो गणेशाय ।

कपिलाय नमस्तस्मै येनाविर्योदधौ जगति मग्ने ।
कारुण्यात् सांख्यमयी नौरिव विहिता प्रतरणाय ।

अल्पग्रन्थं स्पष्टं प्रमाणसिद्धान्तहेतुभिर्युक्तं ।
शास्त्रं शिष्यहिताय समासतोऽहं प्रवक्ष्यामि ॥

दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ । दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ अस्या आर्य्याया: उपोद्घात क्रियते । इह हि भगवान् ब्रह्मसुत: कपिलो नाम तद्यथा—

सनकश्च सनन्दश्च तृतीयश्च सनातन: ।
आसुरि: कपिलश्चैव वोढु:पञ्चशिखस्तथा ।
इत्येते ब्राह्मणपुत्रा: सप्त प्रोक्ता महर्षय: ।

कपिलस्य सह उत्पन्नानि धर्मो ज्ञान वैराग्यमैश्वर्यञ्चेति ।

